॥याज्ञिक्युपनिषद्विवरणम् ॥

तैत्तिरीयोपनिषदि
याज्ञिक्युपनिषद्विवरणम्
श्रीपुरुषोत्तमानन्दतीर्थविरचितम्

श्रीरामं काशिकाकान्तं शंकराचार्यमुत्तमम् ।
सुरेशं वार्तिकाचार्यं नौमि विद्यागुरूनपि ॥१॥
ब्रह्मामृतप्रचुरशंकररस्यराजद्रामायणामृतरसज्ञरसज्ञविज्ञान्
।
श्वःश्रेयसप्रदकृपानिलयान् प्रणौमि श्वःश्रेयसाय महते
शिवरामतीर्थान् ॥२॥

अम्भस्य पारे भुवनस्य मध्ये
नाकस्य पृष्ठे महतो महीयान् ।
शुक्रेण ज्योतीꣳषि समनुप्रविष्टः
प्रजापतिश्चरति गर्भे अन्तः॥
i.v. 1

आदावाद्यानुवाकस्य ब्रह्मतत्त्वावबोधिकाः ॥८॥
ऋचः काश्चन तत्रैषा प्रथमा संप्रवर्तते ।
जलस्य परतीरे यो लोकालोकादिको महान् ॥९॥
यः पृथिव्यादिलोकस्य मध्ये मेर्वादिको महान् ।
स्वर्गलोकस्य पृष्ठे यो ब्रह्मलोकादिको महान् ॥१०॥
ततोऽप्यस्मात्समन्ताच्च महेशः स्यान्महत्तरः ।
अनुप्रविष्टश्चेतांसि जीवचैतन्यरूपतः ॥११॥
गर्भे ब्रह्माण्डरूपेऽन्तर्विराड्रूपोऽवतिष्ठते ।
मायया व्यापकोऽपीशो ब्रह्माण्डस्थो विराट्तया ॥१२॥
देहेषु जीवरूपेण स्थित इत्यर्थ ईरितः ।

जलस्य; समुद्रजलस्येत्यर्थः । विराट्तया; विराड्रूपेणेत्यर्थः ।

अग्निर्मूर्धा चक्षुषीति विराड्रूपं च मुण्डके ॥१३॥
अग्निः प्रकाशसंयुक्तो द्युलोकोऽत्राभिधीयते ।

इति मुण्डके कथितमित्यर्थः ।

यस्मिन्निदꣳ सं च वि चैति सर्वं
यस्मिन् देवा अधिविश्वे निषेदुः ।
तदेव भूतं तदु भव्यमा इदं
तदक्षरे परमे व्योमन्॥
i.v. 2

समेति च व्येतिचेदं यस्मिन्नव्याकृते जगत् ॥१४॥
समुत्पन्नं संगतं स्यात्सृष्टकालेऽथ संहृतौ ।
विलीनं विगतं च स्याद्यस्मिन्नव्याकृतेऽधके ॥१५॥
अधिशब्दोऽधिकार्यः स्यादधिका इति युज्यते ।
देवा हिरण्यगर्भाद्या निषेदुर्नितरां श्रिताः ॥१६॥
तदेवाव्याकृतं भूतमतीतं यगदुच्यते ।
भविष्यद्वर्तमानं च तदेवासीदिदं जगत् ॥१७॥
आसीदर्थक आकारो यद्वाश्चर्यस्य वाचकः ।
तदप्यव्याकृतं नित्ये समुत्कृष्टे परात्मनि ॥१८॥

श्रुतौ शं चेति पाठे सुखमपि प्राप्नोतीत्यर्थः । व्यत्ययेन वा समिति द्रष्टव्यम् ।

येनावृतं खं च दिवं मही च
येनादित्यस्तपति तेजसा भ्राजसा च ।
यमन्तः समुद्रे कवयो वयन्ति
यदक्षरे परमे प्रजाः॥
i.v. 3

पूर्वमव्याकृतं प्रोक्तं परब्रह्मसमाश्रितम् ।
तेनोपहितचैतन्यं यगद्धेतुरिहोच्यते ॥१९॥
येनान्तरिक्षलोकश्च द्युलोको व्याप्त उच्यते ।
भूलोकश्च चकाराभ्यां देहास्तल्लोकवासिनः ॥२०॥
तपत्यनुगृहीतः सन् येनेशेनाखिलम् जगत् ।
स्वीयभास्वररूपेण कुरुते संप्रकाशितम् ॥२१॥
रश्मिलक्षणदीप्त्या च संतप्तं कुरुते रविः ।
तत्त्वज्ञ जगतो मध्ये तन्तूनिव वयन्ति यम् ॥२२॥

यथा पटस्वरूपे च तन्तवोऽनुगतास्तथा ।
जगत्यनुगतं ब्रह्म सदा पश्यन्ति सूरयः ॥ २३॥
तद्ब्रह्म नित्ये परमे स्वस्मिन् स्थित्वा सृजेत्प्रजाः ।
स्वरूपेऽवस्थितिश्चास्य स्वे महिम्नीति संश्रुता ॥ २४॥
आधारान्तरराहित्यं भवेत्स्वस्मिन्नवस्थितः ।

यतः प्रसूता जगतः प्रसूती
तोयेन जीवान् व्यचसर्ज भूम्याम् ।
यदोषधीभिः पुरुषान् पशूꣳश्च
विवेश भूतानि चराचराणि॥
i.v. 4

पूर्वमव्याकृतोपाधि यच्चैतन्यं समीरितम् ॥ २५॥
जगत्कारणता तस्य मन्त्रेऽस्मिन् संप्रपञ्च्यते ।
यस्मात्प्रसूतिर्जगतोऽव्याकृतोपहितात्मनः ॥ २६॥
प्रसूता संप्रवृत्ता स्यादीकारश्छान्दसः श्रुतौ ।
तत्पञ्चभूतैरसृजद् देहान् भूम्यां नरादिकान् ॥ २७॥

व्यचसर्जेति पाठेऽपि व्यससर्जेत्येव विज्ञेयम् ।
विशेषेणासृजदित्यर्थः ।

यद् व्रीह्याद्युपलक्ष्यान्नं भूत्वा देहांश्चराचरान् ।
विवेश नरपश्वादीन् वृक्षादौ वृष्टिरूपतः ॥ २८॥
प्रवेशोऽभ्युपगन्तव्यस्तेनेदं पालितं जगत् ।
श्रुतावपेक्षितं पूरयति --- तेनेति । चैतन्येनेत्यर्थः ।
श्रुतिस्थभूतानीत्यस्य
व्याख्या देहानिति ।

अतः परं नान्यदणीयसꣳ हि
परात्परं यन्महतो महान्तम् ।
यदेकमव्यक्तमनन्तरूपं
विश्वं पुराणं तमसः परस्तात्॥
i.v. 5

निरूप्यतेऽत्र शुद्धं तत्कारणत्वोपलक्षितम् ॥ २९॥
हिरण्यगर्भाद्युत्कृष्टाद्यद्वस्तूत्कृष्टमुच्यते ।

महतो गगनादेर्यन्महान्तं महदीरितम् ॥ ३०॥
सजातीयादिरहितमिन्द्रियादेरगोचरम्॥
अपरिच्छिन्नरूपं च समस्तजगदात्मकम् ॥ ३१॥
अनादिसिद्धं तमसः पृथग्यद्वस्तु वर्तते ।
अतोऽन्यत्परमुत्कृष्टमतिदुर्लक्ष्यवस्तु न ॥ ३२॥

न, नास्तीत्यर्थः ।

तदेवर्तं तदु सत्यमाहुस्तदेव
ब्रह्म परमं कवीनाम् ।
इष्टापूर्तं बहुधा जातं जायमानं
विश्वं बिभर्ति भुवनस्य नाभिः॥
i.v. 6

समस्तजगदात्मत्वमुक्तं यत्तत्प्रपञ्च्यते ।
यच्चिन्तनं यथावस्तु तद्दतं परिकीर्तितम् ॥ ३३॥
वाचा तदुक्तिः सत्यं स्याद्भवेद्ब्रह्मैव तद् द्वयम् ।
विबुधानां परं श्रेष्ठं प्रमाणत्वेन सत्कृतम् ॥ ३४॥
ब्रह्म वेदात्मकं वस्तु तदेव ब्रह्म कीर्तितम् ।
यागादि वैदिकं स्मार्तं वापीकूपादी कर्म च ॥ ३५॥
ब्रह्मैव लोकस्याधारो दधाति सकलं जगत् ।
अतोऽधिष्ठानरूपं स्यादाधेयं सकलं जगत् ॥ ३६॥

भुवनस्य नाभिरित्यस्यार्थमाह --- लोकस्याधार इति ।
बहुधेत्यादि
बिभर्तीत्यन्तस्याअर्थमाह --- दधातीति । धत्त इतियर्थः ।

तदेवाग्निस्तद्वायुस्तत्सूर्यस्तदु चन्द्रमाः ।
तदेव शुक्रममृतं तद्ब्रह्म तदापः स प्रजापतिः॥
i.v. 7

तदेवाग्न्यादिकं शुक्रं नक्षत्राद्यमृतं सुधा ।
हिरण्यगर्भब्रह्मापि तदेव परिकीर्तितम् ॥ ३७॥
आपः पञ्चापि भूतानि विराडाख्यप्रजापतिः ।
तदेव तदधिष्ठानं ब्रह्मैव परिकीर्त्यते ॥ ३८॥
अविद्याद्दष्टितो यद्यद्भाति नानाविधं जगत् ।

विद्यादृष्ट्या समस्तं तद्ब्रह्मैवाखण्डमुच्यते ॥ ३९ ॥

तदेवाग्निरित्यदि चन्द्रमा इत्यन्तस्याथमाह --- तदेवेति ।
ब्रह्मैवेत्यर्थः ।
शुक्रामृतपदयोरर्थमाह --- शुक्रमित्यादिसुधेत्यन्तेन ।
शुक्रं दीप्यमानमिति
वाच्यार्थः॥

सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि ।
कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः॥
i.v. 8
अर्धमासा मासा ऋतवः संवत्सरश्च कल्पन्ताम् ।
स आपः प्रदुधे उभे इमे अन्तरिक्षमथो सुवः
i.v. 9
footnote given by suvaH: अथो सुवः इतेव प्रायिकः पाठः

" प्रकृतिः पुरुषश्चैव नित्यौ कालश्च सत्तम ।
"
इति कलस्य नित्यत्वाद् ब्रह्मतास्य न हीति चेत् ॥ ४० ॥
अविद्यादृष्टिविषयं पुराणवचनं हि तत् ।
विद्यादृष्ट्या तु कालस्य ब्रह्मरूपत्वमिष्यते ॥ ४१ ॥
इत्यभिप्रेत्य तस्यापि तस्मादुत्पत्तिरुच्यते ।
निमिर्वसति येष्वक्ष्णः पक्ष्मपातेषु ते स्मृताः ॥ ४२ ॥
निमिषा निमिषा एव निमेषाः परिकीर्तिताः ।

निमिर्नाम जनकस्य पूर्वज आद्यो मिथिलेश्वर
आसीदित्युपनिषदि
वर्तते । स देववरप्रसादात् पक्ष्मपातेषु तिष्ठतीति
ज्ञेयम् ।

पक्ष्मपातप्रमाणोऽयं कालो निमिषशब्दितः ॥ ४३ ॥
ते स्वप्रकाशात्संपूर्णात्परेशादधिजज्ञिरे ।
निमेषेभ्योऽधिकाः काष्ठाः कलास्ताभ्योऽधिका मताः ॥ ४४ ॥
अष्टादश निमेषास्तु काष्ठा इत्यादिकस्मृतेः ।
चकाराभ्यामनुक्तस्य लवादेरपि संग्रहः ॥ ४५ ॥
तच्च सर्वश इत्युक्त्या विस्पष्टं परिकीर्तितम् ।

लवत्रुट्यादिकाः सर्वे समुत्पन्नाः परात्मनः ॥ ४६॥
नलिनीपत्रसंहत्यां सूक्ष्मसूच्या विभेदने ।
दले दुले तु जः कालः स कालो लववाचकः ॥ ४७॥
लवैस्त्रुटिः स्यात् त्रिंशद्भिरित्याद्युक्तं मनीषिभिः ।
पक्षमासादयः सर्वे महेशादधिजज्ञिरे ॥ ४८॥
संवत्सरो महेशानात्कल्पतां प्रभवादिकः ।
समुत्पन्नोऽत एवायं समर्थः स्वप्रयोजने ॥ ४९॥

कल्पन्तामिति पाठेऽपि सर्वे कालविशेषाः
स्वस्वप्रयोजनसमर्था इति योज्यम् ।

स कालोपहितस्तत्तत्कालौचित्येन दुग्धवान् ।
जलोपलक्षितां पृथ्वीं प्राणिनामभिकाङ्क्षितम् ॥ ५०॥
भोग्यं संपादयामास पृथिव्यां परमेश्वरः ।

स आपः प्रदुघ इत्यस्य तात्पर्यमाह --- प्राणिनामित्यादिना ।

अन्तरिक्षं सुवः स्वर्गमपि चेमे उभे अपि ॥ ५१॥
प्रदुघे स्थानयोर्भोग्यं तयोरजनयत्प्रभुः ।

अपिचेति अथोशब्दार्थः ।

नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् ।
न तस्येशे कश्चन तस्य नाम महद्यशः
i.v. 10
न संदृशे तिष्ठति रूपमस्य
न चक्षुषा पश्यति कश्चनैनम् ।
हृदा मनीशा मनसाभिक्लृप्तो
य एनं विदुरमृतास्ते भवन्ति॥
i.v. 11

कालादिसर्वहेतुत्वात्सर्वत्रानुगतत्वतः ॥ ५२॥
कुतो न गृह्यते सर्वैरिति चेतन्न युज्यते ।
ऊर्ध्वाद्याकारराहित्याद्रूपादेरप्यभावतः ॥ ५३॥
पुरुषः कश्चिदप्येनं न गृह्णात्यूर्ध्वताकृतिम् ।
तिर्यगाकारयुक्तं वा क्वचिन्मध्ये स्थितं च वा ॥ ५४॥

तस्यात्मनो न कोऽपीशो नेष्ट इत्यर्थ ईरितः ।
मम ग्रहणसिद्ध्यर्थं त्वमीदृग्रूपवान् भव ॥ ५५ ॥
इति तं परमात्मनं नियन्तु न हि शक्नुयात् ।
अत एवात्मनो नाम महद्यश इति स्थितम् ॥ ५६ ॥
अतिस्वातन्त्र्यतस्तस्य यशमोऽभ्यधिकत्वतः ।
न दृष्टविषये रूपं तिष्ठत्यस्य परात्मनः ॥ ५७ ॥
कुशलोऽपि पुमान् कश्चिच्चक्षुषा तं न पश्यति ।
कथं ब्रह्मावबोधः स्यादिति चेदभिधीयते ॥ ५८ ॥
लौकिकार्थमनोवृत्तीर्यदीष्टे तेन चेतसा ।
निश्चितो हृदयस्थेनपरमात्मा भवेदयम् ॥ ५९ ॥
मनो हि योगयुक्तं सद्वृत्तीरन्या नियच्छति ।
तेनैकाग्रेण मनसा परमात्माअनुभूयते ॥ ६० ॥
एकाग्रमनसैनं ये साक्ष्हात्कुर्वन्ति ते नराः ।
देहात्प्राणविनिष्क्रान्तिर्मरनं तद्विवर्जिताः ॥ ६१ ॥

अद्भयः संभूतो हिरण्यगर्भ इत्यष्टौ ॥

i.v. second line following verse 11
the i.v. continues with a subdivision into 15 verses not mentioned in the book

उक्थार्तस्य दृढत्वाय प्रदेशान्तरवर्तिनः ।
मन्त्रानुदाहरत्यद्भयः संभूत इति वाक्यतः ॥ ६२ ॥
अद्भयः संभूत इत्येतत्प्रतीकग्रहणं कृतम् ।
तत्रानुवाके प्रोक्तं हि य एवमिति वाक्यतः ।
मरणेन विहीनत्वं ब्रह्मविज्ञानशालिनः ॥ ६३ ॥

" य एनं विद्वनमृत इह भवति " इति
वाक्येनेत्यर्थः ।

हिरण्यगर्भ इत्याद्या ऋचोऽष्टौ याः समीरिताः ।
संहितायां चतुर्थे हि काण्डे त्वाद्यप्रपाठके ॥ ६४ ॥
आत्मोपलक्ष्हकत्वेन सूत्रादेरभिधानतः ।
ता अप्यत्रोपयुक्ताः स्युरित्येवमवगम्यताम् ॥ ६६ ॥

प्रपाठके या उत्तास्त अप्यत्रोपयुक्ताः ।
तत्र हेतुः , आत्मेत्यादिः ॥

एष हि देवः प्रदिशोऽनु सर्वाः
पूर्वो हि जातः स उ गर्भे अन्तः ।
स विजायमानः स जनिष्यमाणः
प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः॥
i.v. 12
विश्वतश्चक्षुरुत विश्वतो मुखो
विश्वतो हस्त उत विश्वतस्पात् ।
सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी
जनयन् देव एकः॥
i.v.13

यथा हिरण्यगर्भाद्याः परमात्मोपलक्ष्हकाः ।
तथा जगद्विराट् चैनमात्मनमुपलक्ष्हयेत् ॥ ६७॥
एष स्वयंप्रकाशात्मा प्राच्याद्याः सकला दिशः ।
अनुप्रविश्य स्थितवान् प्रसिद्धं हि प्रवेशनम् ॥ ६८॥
हिरण्यगर्भरूपत्वात्पूर्वोत्पन्नः स एष हि ।
ब्रह्माण्डरूपगर्भस्य मध्येऽसावेव वर्तते ॥ ६९॥
प्रत्यङ्ङन्नमयादिभ्योऽप्यान्तरः स महेश्वरः ।
मोखा मुख्यस्य देहादेरध्यक्ष्हत्वेन सोऽच्युतः ॥ ७०॥
रूपादिबुद्धिद्वाराणि चक्ष्हुरादीनि सर्वतः ।
यस्यासौ तादृशस्तिष्ठत्यधिष्ठानतयास्य च॥

अस्य; जगत इत्यर्थः ।

ब्रह्माण्डदेहवत्त्वेन सर्वदेहात्महत्वतः ।
तदक्ष्ह्यादियुतत्वात्स विश्वतश्चक्ष्हुरादिनाम् ॥ ७२॥
धर्माधर्माख्यबाहुभ्यां सर्वं संनमतीश्वरः ।
वशी करोति सर्वं च जगदित्यर्थ ईरितः ॥ ७३॥
पतत्रैः पतयिष्णुत्वान्महाभूतैश्च पञ्चभिः ।
सर्वं संनमतीशानो जगदुत्पादयत्ययम् ॥७४॥
एवं देवः स्वप्रकाशो द्यावाभूम्यादिकं प्रभुः ।
उत्पादयञ्जगत्कृत्स्नमेक एवावतिष्ठते ॥ ७५॥

वेनस्तत्पश्यन् विश्वा भुवनानि
विद्वान् यत्र विश्वं भवत्येकनीडम् ।

यस्मिन्निदꣳसं च वि चैकꣳस
ओतः प्रोतश्च विभुः प्रजासु॥
i.v. 14
प्र तद्वोचे अमृतं नु विद्वान्
गन्धर्वो नाम निहितं गुहासु ।
त्रीणि पदा निहिता गुहासु
यस्तद्वेद सवितुः पिता सत्॥
i.v. 15

श्रद्धाप्रकर्षमुक्तेऽर्थे कर्तुं मन्त्रद्वयेन च ।
संदर्शयति वृत्तान्तं गन्धर्वस्य श्रुतिः स्वयम् ॥७६॥
जगत्समस्तं यात्रात्मन्येकनीडं भवत्यदः ।
एकत्वेन स्थितिं गच्छत्तदात्म्यं प्रतिपद्यते ॥७७॥
तद्वस्त्वनुभवन् साक्ष्हात्सर्वाणि भुवनानि च ।
विद्वान्यो वर्तते जानन्नत्मत्वेनाखिलं जगत् ॥७८॥
आत्मस्साक्ष्हात्कृतौ सर्वं तद्रूपमिति भाति हि ।
स वेनसन् ज्ञो गन्धर्वः सर्वेषां बुद्धिषु स्थितम् ॥७९॥
अमृतं नाशरहितं तद्वस्तु स्वानुभूतितः ।
विध्वान् प्रवोचे शिष्येभ्यह्ः प्रोवाच खलु सादरम् ॥८०
॥

स्वानुभवेन विद्वानित्यर्थः ।नुशब्दार्थः खल्विति ।

वेनेन दृष्टे यस्मिंश्च परमात्मानि वस्तुनि ।
इदं सर्वं समुत्पन्नं विलीनं च भवेज्जगत् ॥८१॥
एकमद्वयतत्त्वात्मा स व्यापी सन्महेश्वरः ।
दीर्घतन्तुवदोतः स्यात्प्रजासु सकलास्वपि ॥८२॥
प्रोतस्तिर्यक्तन्तवच्च सर्वत्रैवावतिष्टते ।
जाग्रत्स्वप्नादिरूपाणि त्रीणि स्थानानि बुद्धिषु ॥८३॥
स्थितानि यस्तु गन्धर्वस्तदधिष्टानमीश्वरम् ।
विजानाति स गन्धर्वो भवति स्वपितुः पिता ॥८४॥
ब्रह्मज्ञो ब्रह्मरूपेण जगदुत्पादकत्वतः ।
भवत्युत्पादकस्यापि स्वयमुत्पादकः पितुः ॥८५॥
यस्ता विजानात्सवितुः पिता सदिति हि श्रुतिः ।

तदिति ; जागराद्यधिष्टानमित्यर्थः॥

7 Nov 2001 - WK

स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा ।
यत्र देवा अमृतमानशानास्तृतीये धामान्यभ्यैरयन्त॥
i.v. 16
परि द्यावापृथिवी यन्ति सद्यः परि लोकान्
परि दिशः परि सुवः ।
ऋतस्य तन्तुं विततं विचृत्य
तदपश्यत् तदभवत्प्रजासु॥
i.v. 17

व्यवहारदशायां च सर्वप्राण्युपकारिता ॥८६॥
तद्दर्शिमुक्तिदत्वं च मन्त्राभ्यां तस्य कथ्यते ।
स नो बन्धुः स्वपुण्येन हितकृत्तवान्महेश्वरः ॥८७॥
जनिता सर्वहेतुत्वात् स निर्माताखिलस्य सन् ।
सर्वानुच्चावचाल्लँ्लोकांस्तेषु स्थानानि यानि च ॥८८॥

I had to use a double l in order to reproduce the original.

It probably reads (without sandhi) ... वच्चान् लोकान्

योग्यानि देवतादीनांतानि जातानि सर्वदृक् ।
यत्र तृतीये स्वर्गाख्ये देवा इन्द्रादयोऽमृतम् ॥८९॥
पिबन्तः प्राप्तवन्तश्च स्वीयस्थानानि सर्वतः ।
तत्समस्तं विदित्वायं तत्तत्कर्मानुसारतः ॥९०॥
फलं प्रयच्च्वतीत्यर्थो मन्त्रस्यास्य प्रकीर्तितः ।
ये स्युर्मुमुक्ष्ह्वस्ते तु ब्रह्मतत्त्वार्थ्वेदिनः ॥९१॥
द्यवाभूमीद्वयं सद्यह् परितो व्याप्नुवन्ति च ।
अन्तरिक्ष्हादिकाल्लँ्लोकान्प्राच्याद्याः सकला दिशः ॥९२॥

same here: इक्ष्हादिकान् लोकान् .

स्वर्गलोकं च परितो यन्ति सर्वात्मकत्वतः ।
सत्यस्य ब्रह्मणस्तन्तुमविच्छेदेन संस्थितम् ॥९३॥
विस्थीर्णं स्याद्यथा शास्त्रान्निश्चित्य गुरुतश्च तत् ।
यः साक्ष्हात्कृतवान् ब्रह्म स प्रजास्वभवच्च तत् ॥९४
॥
श्रुत्यन्तरं ब्रह्म वेद ब्रह्मएव भवतीति हि ।

26 Feb 2002

परीत्य लोकान् परीत्य भूतानि
परीत्य सर्वाः प्रदिशो दिशश्च ।
प्रजापतिः प्रथमजा ऋतस्यात्मनात्मानमभिसंबभूव॥
i.v. 18

अम्भस्येत्यादिना प्रोक्ता ब्र्हमविद्या निगम्यते ॥ ९५॥
सत्यस्य ब्रह्मणो ह्याद्यकार्यरूपं प्रजापतिः ।
हिरण्यगर्भो भूरादीन् लोकान्देवनरादिकान् ॥ ९६॥
देहान्परीत्यविदिशः प्राच्यादुकदिशोऽपि च ।
सर्वतो व्याप्य समये सृष्टेः सृष्ट्वाखिलं जगत् ॥ ९७॥
स्थितिकाक्ले च रक्षिह्त्वा सत्याद्यात्मानमाप्तवान् ।
आत्मना स्वस्वरूपेण तद्गोचरविबोधतः ॥ ९८॥

सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् ।
सनिं मेधामयासिषम्॥
i.v. 19

प्रार्थ्यते ब्रह्मलाभार्थमन्तर्यामी महेश्वरः ।
सीदत्यस्मिञ्जगत्सर्वमित्यव्याकृतमुच्यते ॥ ९९॥
सदःशब्देन तस्यायं पतिः पालयिता स्मृतः ।
अन्तर्यामी तमीशानं प्राप्तवानस्म्ययासीषम् ॥ १००॥
शीघ्रं संप्राप्नवानीति मत्वा भूतार्थकीर्ततम् ।
possibly kiirtitam.h?

इति मत्वा; इति विवक्ष्हयेत्यर्थः ।

अचिन्त्यचित्रजगतोऽनायासेन कृतत्वतः ॥ १०१॥
आश्चर्यरूपमिन्द्रस्य देवराजस्य च प्रियम् ।
कदा लप्स्येऽहमित्येवमिन्द्रोऽप्याशास्ति हीश्वरम् ॥ १०२॥
सर्वैरन्यैरपेक्ष्ह्यं च सनिं कर्मफलात्मकम् ।
क्रियाफलप्रदातारं श्रुताधीतस्य धारणे ॥ १०३॥
शक्तिं मेधां प्रयच्छन्तमित्यध्याहृतिरिष्यते ।

उद्दीप्यस्व जातवेदोऽपघ्नन्निरृतिं मम ।
पशूंश्च मह्यममावह जीवनं च दिशो दिश॥

i.v. 20

वह्न्युपाधिर्महेशानः प्रार्थ्यतेऽभीष्टलब्धये ॥ १०४ ॥
जाते प्राणिशरीरे यो जाठराग्निस्वरूपतः ।
विद्यते तिष्ठतीत्येवं जातवेदाः स उच्यते ॥ १०५ ॥
उत्पन्नान्यजमानान्वा फलदानाय चेतसि ।
विनिश्चिनोति वेत्तीति जातवेदाः प्रकीर्तितः ॥ १०६ ॥
जातवेदः प्रकर्षेण दीप्यस्वानुग्रहह्य मे ।
ममानिष्टं प्रकुर्वाणां निर्ऋतिं पापदेवतम् ॥ १०७ ॥
विनाशयन्विनाश्यैतां पशून्मह्यं गवादिकान् ।
जीवनं च चकारभ्यां भोग्यजातमशेषतः ॥ १०८ ॥
संपादय निवासार्थं दिशः प्राच्यादिदिग्गातान् ।
निवासान् दिश देहीति मन्त्रार्थः परिकीर्तितः ॥ १०९ ॥

मा नो हिꣳसीज्जातवेदो गामश्वं पुरुषं जगत् ।
अबिभ्रदग्न आगहि श्रिया मा परिपातय॥
i.v. 21

संपादितगदीनां प्रार्थ्यतेऽत्राविनाशानम् ।
हे जातवेदो गामश्वं त्वत्प्रसादाग्दवादिकम् ॥ ११० ॥
मामकीनं च मा हिंसीन्मा नाशयतु निर्ऋतिः ।
जगच्छब्दाग्दवाद्यन्यगृहक्ष्हेत्रादिकीर्तितम् ॥ १११ ॥
अग्नेऽस्मदपराधं त्वं मनस्यस्थापयन्प्रभो ।
आगच्छानुग्रहार्थं मे श्रिया मा परिपातय ॥ ११२ ॥
धनधान्यसमृद्ध्या मां सर्वतः प्रापयेश्वर ।

पुरुषस्य विद्महे सहस्राक्षस्य महादेवस्य धीमहि ।
तन्नो रुद्रः प्रचोदयात्॥
i.v. 22

इतः परं तेषु तेषु देशेष्वतिविलक्ष्हणः ॥ ११३ ॥
श्रितुपाठस्तत्र पूर्वैर्द्राविडः पाठ आदृतः ।
तस्मार्रदनुसारेण श्रुतिव्याख्याधुनोच्यते ॥ ११४ ॥
जायत्रीषड्कतो देवाः प्रार्थ्यन्ते ज्ञानहेतवः ।
विश्वरूपधरो रुद्र?ः प्रार्थ्यते तत्र चादितः ॥ ११५ ॥
विश्वतश्चक्ष्हुरित्युक्तः सहस्राक्ष्हो विराट् पुमान् ।

तस्य स्वरूपं देवस्य जानीमहि लभेमहि ॥ ११६ ॥
तदर्थं तस्य देवस्य रूपं ध्यायेम धीमहि ।
तस्मिन् ध्याने विराड् रुद्रो नोऽस्मिन् प्रेरयतु प्रभुः ॥ ११७ ॥

" बिभ्रद्दोर्भिः कुटारं सृगमभयवरौ सुप्रसन्नो
महेशः "
इत्याद्यागमप्रसिद्धमूर्तिधरं महेशं प्रार्तयते ----

तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात्
i.v. 23

तमागमेषु प्रथितं पुरुषाकृतिमीश्वरम् ।
जानीमहि महादेवम् ध्यायेम सततं वयम् ॥ ११८ ॥
प्रचोदयतु नो रुद्रस्तस्मिन् ध्यने निरन्तरम् ।

" बीजापूरगदेक्षुकार्मुक ---- "
इत्याध्यागमप्रसिद्धमूर्तिधरं
विनायकं प्रार्थयते

तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि ।
तन्नो दन्तिः प्रचोदयात्
i.v. 24

जगतुल्यमुखस्त्वेन दीर्घतुण्डस्य वक्रता ॥ ११९ ॥
यो रत्नकलशस्तस्य धारणायेति मन्यताम् ।
दन्तिर्महादन्तयुक्त इत्यर्थः परिकीर्तितः ॥ १२० ॥

पुराणादिप्रसिद्धं पक्षिहराजमूर्तिधरं देवं प्रार्थयते ----

तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि ।
तन्नो गरुडः प्रचोदयात्
i.v. 27, 25 and 26 do not appear in the book

स्पष्टार्थत्वेन मन्त्रस्य न व्याख्या वार्त्तिकात्मिका ।

" हेमप्रख्यामिन्दुखण्डात्तमौलिम् "
(प्रपञ्चसारः १४ स २३)
इत्याद्यागमप्रसिद्धमूर्तिधरां दुर्गां प्रार्थयते ----

कात्यायनाय विद्महे कन्याकुमारि धीमहि ।
तन्नो दुर्गिः प्रचोदयात्
i.v. 33

कात्यः कृत्तिं वस्त इति श्रीरुद्रः परिकीर्तितः ॥१२१॥
स एव यस्या अयनमधिष्ठानं तथोच्यते ।
कुमारी कुत्सितारिष्टमारिका परिकीर्तिता ॥१२२॥
कन्या च कमनीयासौ कुम्मारी च तथोदिता ।
दुर्गिर्दुर्गैव लिङ्गादेर्व्यत्ययश्छान्दसो भवेत् ॥१२३॥

" अकोर्द्दीप्यत्किरीटान्वितमकरलसत्कुण्डकम्"
इत्याद्यागमप्रसिद्धमूर्तिधरं
देवं प्रार्थयते ----

नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात्
i.v. 29!

नार्शब्दितुमुख्यापो यस्य विष्णोः समाश्रयः ।
समुद्रजलसंवासी स नारायण उव्ह्यते ॥१२४॥
वसुदेवादभिव्यक्तःसोऽवतरविशेषतः ।
परमब्रह्मरूपेण व्यापित्वाद्विष्णुरुच्यते ॥१२५॥
जप्या एताश्च गायत्र्यो देवताध्यानपूर्वकम् ।
अन्तःकरंअशुद्ध्यर्थं सदा सूरिभिरादरात् (1) ॥१२६॥
(1) इतः परं " सहस्रपरमा देवी "
इत्यारभ्य पञ्चमानुवाकपर्यन्तंग्रन्थकृता न विवृतम् ।
----]

इति प्रथमोऽनुवाकः

यश्छन्दसामृषभो
विश्वरूपश्छन्दोभ्यश्चन्दाꣳस्याविवेश ।

सताꣳ शिक्यः प्रोवाचोपनिषदिन्द्रो ज्येष्ठ इन्द्रियाय
ऋषिभ्यो नमो
देवेभ्यः स्वधा पितृभ्यो भूर्भुवः सुवरोम्
i.v. ashhTamo.anuvaakaH 1, says "bhuurbhuvassuvashchhanda om.h" at the end

सर्ववेदान्तलाभाय जप्यो मन्त्र उदीर्यते ।
वेदानां प्रणवः श्रेष्ठो यः सर्वजगदात्मकः ॥१२७॥
प्रादुर्भूतः स वेदेभ्यः प्रतिभातः प्रजापतेः ।
वेदसारतयेत्यर्थः प्रविवेशः पुनश्च सः ॥१२८॥
गायत्र्यादीनि मन्त्रेषु प्रयोज्यस्तद्यतेषु हि ।

मन्त्रेस्विति ; छन्दोभिरूपलक्षिहतेषु प्रयोक्तव्यः ।
तदुक्तं प्रपञ्चसारे ------
" अस्य तु वेदादित्वात् सर्वमनूनां प्रयुज्यते ह्यादौ
" (१९ स्न ३५) इति॥

सतां शिक्यः कर्मभिश्चोपासाकैर्ज्ञानशालिभिः ॥१२९॥
प्राप्तं शक्यः कारणत्वाज्ज्येष्ठः प्रथम उच्यते ।
इन्द्रः प्रनववाच्यात्मा परमैश्वर्यसंजुतः ॥१३०॥
ऋसयोऽन्तर्मुखास्तेषां ज्ञानसामर्थ्यसिद्धये ।
ब्रह्मविद्यां जगौ तस्मात्प्रतिबन्धनिवृत्तये ॥१३१॥
मनस्करोमि देवेभ्यः पितृभ्यश्चाहमादरात् ।
भूर्भुवः सुवरोंवेदांस्त्रिलोकस्थानवाप्नुयाम् ॥१३२॥
अत एव पठन्त्यन्ये छन्द ओमिति मानवाः ।

भूर्भुवः सुवश्छन्द ओमित्यर्थः॥

इति षष्ठोऽनुवाकः book doesn't mention 2-5 - WK

नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं
कर्णयोः श्रुतं मा च्योढ्वं ममामुष्य ओम्॥
i.v. navamo.anuvaakaH 1, says "chyoDhaM"

अवाप्तवेदाविस्मृत्यै जप्यमन्त्र उदीर्यते ॥१३३॥
मनोऽस्तु सर्वजगतां हेतवे परमात्मने ।

ग्रन्थस्य च तदर्थस्य धारणं मेऽस्तु चेतसि ॥ १३४ ॥
अनिराकरणं नामाविस्मृतिः सा यथा भवेत् ।
तथा धारयिताहं स्यां परमेष्ठिप्रसादतः ॥ १३५ ॥
एवं प्रार्थयमानस्य कर्णयोर्यच्छ्रुतं मम ।
अविनाशाय तत्सर्वं प्राप्नुयां स्थिरधारणम् ॥ १३६ ॥

इति सप्तमोऽनुवाकः

ऋतं तपः सत्यं तपः श्रुतं तपः शान्तं तपो दानं
तपो यज्ञ स्तपो भूर्भुवः
सुवर्ब्रह्मैतदुपास्स्वैतत्तपः
i.v. dashamo.anuvaakaH, quotes " ऋतं ॥। शान्तं तपो
दमस्तपः
शमस्तपो दानं तपो यज्ञं तपो भूर्भुवः ..."

एकाग्य्रलक्ष्हणं is "agyra" possible? - WK
यत्स्यत्तपो विज्ञानसाधनम् ।
तत्तपःप्राप्तये जप्यो मन्त्रोऽयमधुनोच्यते ॥ १३७ ॥
ऱ् इतं वेदार्थबोधाय मीमांसाश्रवणं मतम् ।

मीमांसयोह् श्रवणंइत्यर्थः ।

इन्द्रयोपरतिः शान्तिः शान्तिशब्देन कीर्त्यते ॥ १३८ ॥
स्वस्वत्यागः परस्वत्वापत्त्यन्तो दानमुच्यते ।

आपत्तीति ; आपादनपर्यन्त इत्यर्थः ।

अग्निहोत्रादिको यज्ञस्तत्सर्वं तप उच्यते ॥ १३९ ॥
विराट्स्वरूपंयद्ब्रह्म भूरादित्रितयात्मकम् ।
मुमुक्ष्हो त्वमुपास्स्वैतत्प्रत्यायवर्ततं कुरु ॥ १४० ॥
एतच्चोपासनं प्रोक्तमुत्तमं तप उच्यते ।

इत्यष्टमोऽनुवाकः

Encoded by Wim en Esther (wkl-evdk@knoware.nl)

Please send corrections to sanskrit@cheerful.com
Last updated September 9, 2002